# PavamAnasukta or Punyahavachanam

# पवमानसूक्तम् अथवा पुण्याहवाचनम्

## Document Information

Text title : Pavamanasuktam 1 or Punyahavachanam from taittirIya saMhitA brAhmaNam

File name : pavamana.itx

Category : sUkta, veda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer

Proofread by : Rajagopal Iyer

Description-comments : mantrapuShpam. taittirIya saMhitA 5.6.1, taittirIya brAhmaNam 1.4.8

Latest update : February 27, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 1, 2026

*sanskritdocuments.org*

# पवमानसूक्तम् अथवा पुण्याहवाचनम्

तैत्तिरीय संहिता । काण्डम् - ५, प्रपाठकः - ६, अनुवाकः - १
तैत्तिरीय ब्राह्मणम् । अष्टकम् - १, प्रश्नः - ४, अनुवाकः - ८

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय। गातुं यज्ञपतये । दैवीस्स्वस्तिरस्तु नः ।
स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे। शं चतुष्पदे ।
ॐ शान्तिश्शान्तिश्शान्तिः ।

ॐ ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शꣳ स्योना भवन्तु ॥

यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम् ।
मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शꣳ स्योना भवन्तु ॥

यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शꣳ स्योना भवन्तु ॥

शिवेन मा चक्षुषा पश्यताऽऽपश्शिवया तनुवोप स्पृशत त्वचं मे ।
सर्वाꣳअग्नीꣳ रप्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त ॥

पवमानस्सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः ।
पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा ।
शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूꣳ रनु। यत्ते पवित्रमर्चिषि। अग्ने विततमन्तरा ।
ब्रह्म तेन पुनीमहे । उभाभ्यां देवसवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ।
वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः ।
तया मदन्तः सधमाद्येषु । वयꣳ स्याम पतयो रयीणाम् ।
वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयो भूः ।
द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् ।

बृहद्भिः सवितस्तृभिः । वर्षिष्ठैर्देवमन्मभिः ।
अग्ने दक्षैः पुनाहि मा । येन देवा अपुनत ।
येनापो दिव्यंकशः । तेन दिव्येन ब्रह्मणा । इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति।
ऋषिभिस्सम्भृतꣳ रसम्। सर्वꣳ स पूतमश्नाति ।
स्वदितं मातरिश्वना । पावमानीर्यो अध्येति।
ऋषिभिस्सम्भृतꣳ रसम्। तस्मै सरस्वती दुहे । क्षीरꣳ सर्पिर्मधूदकम् ॥
पावमानीस्स्वस्त्ययनीः । सुदुघाहि पयस्वतीः ।
ऋषिभिस्सम्भृतो रसः । ब्राह्मणेष्वमृतꣳहितम् ।
पावमानीर्दिशन्तु नः । इमं लोकमथो अमुम् ।
कामान्थ्समर्धयन्तु नः । देवीर्देवैः समाभृताः ।
पावमानीस्स्वस्त्ययनीः । सुदुघाहि घृतश्चुतः ।
ऋषिभिस्संभृतो रसः । ब्राह्मणेष्वमृतꣳहितम् ।
येन देवाः पवित्रेण । आत्मानं पुनते सदा।
तेन सहस्रधारेण । पावमान्यः पुनन्तु मा ।
प्राजापत्यं पवित्रम्। शतोध्यामꣳ हिरण्मयम्।
तेन ब्रह्म विदो वयम् । पूतं ब्रह्म पुनीमहे ।
इन्द्रस्सुनीती सहमा पुनातु । सोमस्स्वस्त्या वरुणस्समीच्या।
यमो राजा प्रमृणाभिः पुनातु मा । जातवेदा मोर्जयन्त्या पुनातु । भूर्भुवस्सुवः ।
ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय। गातुं यज्ञपतये । दैवीस्स्वस्तिरस्तु नः ।
स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे। शं चतुष्पदे ।
ॐ शान्तिश्शान्तिश्शान्तिः ।

## पवमानसूक्तम् अथवा पुण्याहवाचनम् स्वररहितम्

तैत्तिरीय संहिता । काण्डम् ५ प्रपाठकः ६ अनुवाकः १
तैत्तिरीय ब्राह्मणम् । अष्टकम् १ प्रश्नः ४ अनुवाकः ८

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीस्स्वस्तिरस्तु नः ।
स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।

ॐ शान्तिश्शान्तिश्शान्तिः ।

ॐ ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शm+ स्योना भवन्तु ॥

यासाm+ राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम् ।
मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शm+ स्योना भवन्तु ॥

यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शm+ स्योना भवन्तु ॥

शिवेन मा चक्षुषा पश्यताऽऽपश्शिवया तनुवोप स्पृशत त्वचं मे ।
सर्वाm+ अग्नीm+ रप्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त ॥

पवमानस्सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः ।
पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा ।
शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूm+ रनु । यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा ।
ब्रह्म तेन पुनीमहे । उभाभ्यां देवसवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ।
वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः ।
तया मदन्तः सधमाद्येषु । वयm+ स्याम पतयो रयीणाम् ।
वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयो भूः ।
द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् ।
बृहद्भिः सवितस्तृभिः । वर्षिष्ठैर्देवमन्मभिः ।
अग्ने दक्षैः पुनाहि मा । येन देवा अपुनत ।
येनापो दिव्यंकशः । तेन दिव्येन ब्रह्मणा । इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति।
ऋषिभिस्सम्भृतm+ रसम् । सर्वm+ स पूतमश्नाति ।
स्वदितं मातरिश्वना । पावमानीर्यो अध्येति।
ऋषिभिस्सम्भृतm+ रसम् । तस्मै सरस्वती दुहे । क्षीरm+ सर्पिर्मधूदकम् ॥

पावमानीस्स्वस्त्ययनीः । सुदुघाहि पयस्वतीः ।
ऋषिभिस्सम्भृतो रसः । ब्राह्मणेष्वमृतm+ हितम् ।
पावमानीर्दिशन्तु नः । इमं लोकमथो अमुम् ।
कामान्थ्समर्धयन्तु नः । देवीर्देवैः समाभृताः ।
पावमानीस्स्वस्त्ययनीः । सुदुघाहि घृतश्चुतः ।
ऋषिभिस्संभृतो रसः । ब्राह्मणेष्वमृतm+ हितम् ।
येन देवाः पवित्रेण । आत्मानं पुनते सदा।

तेन सहस्रधारेण । पावमान्यः पुनन्तु मा ।
प्राजापत्यं पवित्रम् । शतोध्यामm+ हिरण्मयम्।
तेन ब्रह्म विदो वयम् । पूतं ब्रह्म पुनीमहे ।
इन्द्रस्सुनीती सहमा पुनातु । सोमस्स्वस्त्या वरुणस्समीच्या।
यमो राजा प्रमृणाभिः पुनातु मा । जातवेदा मोर्जयन्त्या पुनातु । भूर्भुवस्सुवः ।

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीस्स्वस्तिरस्तु नः ।
स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।
ॐ शान्तिश्शान्तिश्शान्तिः ।

taittirIya saMhitA 5.6.1, taittirIya brAhmaNam 1.4.8
Encoded with Accents by Rajagopal Iyer

---

*PavamAnasukta or Punyahavachanam*
pdf was typeset on March 1, 2026

Please send corrections to *sanskrit@cheerful.com*